# सप्तदशः पाठः

CPF6AY

## प्रयाण-गीतम्



पदं पदं प्रवर्धते

किशोरगुल्मसैनिकः।

जयत्व-कामनायुतः

विजेतृगीतगायकः।।1।।

स्वतन्त्रता-प्रवर्तकः

स्वतन्त्रदेशरक्षकः।

स्वतन्त्रता-सुवर्ण-जन्य-

वर्ण-मोद-वर्धकः।। पदं पदं प्रवर्धते।।2।।

अशोक-चक्रशोभितः,

करे ध्वजः त्रिवर्णिकः।

हृदि प्रतापवीरता,

अदम्यसाहसान्वितः।। पदं पदं प्रवर्धते।।3।।

न मार्गरोधने क्षमाः,

समुद्रपर्वतादिकाः।

समस्तवैरिनाशकः,

यथा सुवीरसायकः।। पदं पदं प्रवर्धते।।4।।

शब्दार्थः

**गुल्म**=सैन्यदल। **विजेतृ**=विजेता। **मोद**=प्रसन्नता। **त्रिवर्णिकः**=तीनवर्णों वाला, तिरङ्गा। **अदम्य**=जिसका दमन न किया जा सके। **साहसान्वित**=साहसयुक्त, साहसी। **रोधने**=रोकने में। **सुवीरसायकः**=अच्छे वीरों के बाण। **प्रतापवीरता**=राणाप्रताप की वीरता। **स्वतन्त्रता-सुवर्ण-जन्य-वर्ण-मोद-वर्धकः** =स्वतन्त्रता रूपी स्वर्ण से उत्पन्न स्वर्णिम आनन्द कं बढ़ाने वाला। **प्रवर्धते**=आगे बढ़ रहा है। **क्षमाः**=समर्थ।

**अन्वयः**

(1) जयत्व-कामनायुतः विजेतृगीतगायकः किशोरगुल्मसैनिकः पदं पदं प्रवर्धते।

(2) स्वतन्त्रताप्रवर्तकः स्वतन्त्रदेशरक्षकः स्वतन्त्रता-सुवर्ण-जन्य-वर्ण-मोद-वर्धकः (पदं पदं प्रवर्धते)

(3) अशोकचक्रशोभितः त्रिवर्णिकः ध्वजः(यस्य)करे, प्रतापवीरता(यस्य) हृदि, अदम्यसाहसान्वितः(सः) पदं पदं प्रवर्धते।

(4) समुद्रपर्वतादिकाः(यस्य) मार्गरोधने न क्षमाः,(यः) सुवीर-सायकः यथा समस्तवैरिनाशकः, (सः) पदं पदं प्रवर्धते।

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

विजेतृ, गीतगायकः, त्रिवर्णिकः,

समस्तवैरिनाशकः , अदम्यसाहसान्वितः, प्रवर्धते।

**2. एकपदेन उत्तरत-**

(क) कः पदं पदं प्रवर्धते?

(ख) ध्वजः कीदृशः अस्ति?

(ग) के मार्गरोधने क्षमाः न सन्ति?

(घ) किशोरगुल्मसैनिकः कः इव समस्तवैरिनाशकः अस्ति?

**3. वाक्यानि पूरयत-**

(क) किशोरगुल्म- ............................।

(ख) विजेतृगीत- ............................।

(ग) स्वतन्त्रदेश- .............................।

(घ) वर्णमोद- ............................।

**4. अधोलिखित-पदानां विलोमपदानि लिखत-**

यथा- स्वतन्त्रता - परतन्त्रता

रक्षकः - ....................

क्षमाः - ....................

वीरता - ....................

**5. हिन्दीभाषायाम् अनुवादं कुरुत-**

(क) भारतीय ध्वज में अशोक चक्र सुशोभित है।

(ख) राष्ट्रीय ध्वज में तीन रंग हैं।

(ग) राष्ट्रसैनिकों की जय हो।

**6. अधोलिखित-पदानां विभक्तिं वचनं च लिखत-**

पदम् विभक्तिः वचनम्

यथा- देशेन तृतीया एकवचनम्

किशोरान् ................ ....................

अशोकस्य ................ ....................

शोभिते ................ ....................

चक्रात् ................ ....................

**7- अधोलिखितानि पदानि प्रयुज्य वाक्यरचनां कृरुत-**

सैनिकः, गायकः, रक्षकः, ध्वजः।

**शिक्षण-सङ्केतः**

(क) अस्य पाठस्य सर्वेषां पद्यानां सैन्यगीतस्य ध्वनौ गानस्य अभ्यासं कारयत।

(ख) राष्ट्रस्य विषये दश वाक्यानि लेखयत।

**एतदपि जानीत-**

भारतीयसंस्कृतौ चत्वारः पुरुषार्थाः भवन्ति -

धर्म-अर्थ-काम-मोक्ष च।